उपशास्त्री-I खण्ड साहित्य तृतीय पत्रम्

किरातार्जुनीयमहाकाव्यम्

प्रथमः सर्गः

प्र० (1) - उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति दुर्योधनः महायशाः दयालुः प्रशमितोपद्रवमुदयं सम्पादयन् कुबेरोपमः संप्रति वर्तते, अस्य एतैर्गुणैर्मुग्धतया प्रसन्ना सती पृथ्वी धनानि स्वयमेवास्मै प्रददाति।

व्याख्या :- उदारकीर्तेः = विशाल कीर्ति वाले। दयावतः = दयालु। अभिरक्षया = सब प्रकार रक्षा करने से। प्रशान्त हो गई है बाधाएँ जिसमें ऐसे, उदयं = अभ्युदय को, दिशतः = दर्शाते हुए वसूपमानस्य = कुबेर के समान, स्वयं समृद्ध, अस्य = इस दुर्योधन के। गुणैः = दयादाक्षिण्यादि से, उपस्नुता = द्रवित हुई, मेदिनी = पृथ्वी, स्वयं = अपने आप ही, वसूनि = धनों को, प्रदुग्धे = दुह देती है।

Renu Devi
28/10/20
राधा उमाकान्त सं० महावि० सुरखसेना,
पूर्णिया।

शास्त्री - I खण्ड साहित्य

अभिज्ञान शाकुन्तलम्

Date
Page

प्र० (1) स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि ।
उपरागान्ते शशिनः समुपगता रोहिणी योगम् ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञान शाकुन्तलम् नाट्य काव्यस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके अथ राजा पूर्ववृत्तविस्मरणात् मया त्वयि क्रौर्यमाचरितमिति वदन् तामावर्जयितुं वदति-

स्मृतीति = हे सुमुखि सुष्ठु = शोभनं मुखं = वदनं यस्याः सा सुमुखी तत्सम्बुद्धौ हे सुमुखि! = हे प्रसन्नवदने प्रिये! दिष्ट्या = सौभाग्येन स्मृतिभिन्नमोहतमसः = स्मृत्या = स्मरणे भिन्नं = दूरीकृतं मोह एव तमः = अज्ञानं यस्य स तस्य स्मृतिभिन्नमोहतमसः = स्मरणापगतमोहान्धकारस्य मम = दुष्यन्तस्य प्रमुखे = संमुखे स्थितासि तव योगो मम जात इति भावः शशिनः = चन्द्रमसः उपरागः = राहुग्रसनं तस्यान्ते = निवृत्तौ उपरागान्ते = ग्रहणान्ते रोहिणीयोगं रोहिण्याः योगो रोहिणीयोगः तं रोहिणीयोगम् = रोहिणीनक्षत्रसंयोगं भर्तृसान्निध्यरूपं सम्बन्धं समुपगता = प्राप्ता ।

अयं भावः - प्रिये पुरा मोहान्धेन मया संमुखमागतासि मम कठोरहृदयतया त्वं निराकृता सांप्रतं सौभाग्यमहिम्नास्मरणेन मे मोहोऽपगता । यथा दुष्टेन राहुणा ग्रहेण ग्रस्तश्चन्द्रमाः दक्षपुत्र्या स्वप्रियया रोहिण्या वियुज्यते, मुक्तश्च पुनः तया संयुज्यते तथैवाहं निर्मलमानसोऽपि प्राक् मोहान्धकारेणाच्छन्न सौभाग्येनाधुना मुक्ता पुनस्त्वया सह संयुक्तो जात इति ग्रहणावसाने चन्द्रमसः स्वकान्तया रोहिण्या सह सम्बन्ध इव मया सह त्वत्समागमोऽयमिति भावः । अत्र निदर्शनदृष्टान्तालङ्कारो आर्या वृत्तञ्च ।

Renu Devi
28/10/20

राधा उमाकान्त संस्कृत महावि० सुखसेना, पूर्णिया

उपशास्त्री प्रखण्ड साहित्य - तृतीय - पत्रम्

किरातार्जुनीयमहाकाव्यम् :

प्रथमः सर्गः

प्र०(1) - वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ।।

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - भूमिशयनात् संजातकर्कशशरीरौ विकीर्णरुक्षमूर्धजौ चैतौ यमजौ नकुलसहदेवौ विलोक्य कथमिदानीमपि त्वं संतोष धैर्यं चावलम्बसे इति महदाश्चर्यम् ।

व्याख्या - वनान्तशय्याकठिनीकृताकृती = वन भूमि में सोने से कठोर हो गई है देह जिनकी ऐसे । विष्वक् = चारों ओर । कचाचितौ = केशों से व्याप्त । ( अर्थात् जिनके सिर के बाल बढ़कर देह के चारों ओर लटके हैं ऐसे ) अगजौ = पहाड़ में उत्पन्न । गजौ इव = हाथियों की तरह (दीखते हुए) । एतौ यमौ = इन जुड़वाँ (नकुल - सहदेव) को । विलोकयन् = देखते हुए (भी) । त्वं = तुम धृतिसंयमौ = संतोष और धैर्य को । बाधितुं = छोड़ने के लिए कथं न उत्सहसे = क्यों नहीं तैयार होते ? ।

Renu Devi
28/10/20

राध्या उमाकान्त सं० महावि० सुखसेना
पूर्णिया ।

शास्त्री - III खण्ड साहित्य

रघुवंश महाकाव्यम्

त्रयोदशः सर्गः

प्र० (1) - दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला ।
आभाति वेला लवणाम्बुराशेर्धारानिबद्धेव कलङ्करेखा ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति - अयि सीते ! लोहचक्रसदृशस्य लवणार्णवस्य दूराद्दनुत्वेनावभासमाना तमालतालीवनराजिनी लवणा तीरभूमिः भ्रमच्चक्रसंसक्ता मालिन्यरेखा इव प्रतीयते इति भावः ।

व्याख्या - अयश्चक्रनिभस्य = लोहचक्रसदृशस्य । लवणाम्बुराशेः = क्षारनिधेः, समुद्रस्य । दूरात् = विप्रकृष्टात् । तन्वी = कृशा । तमालतालीवनराजिनीला = तापीच्छतालवनपङ्क्तिनीला । वेला = तीरभूमिः । धारानिबद्धाः = चक्राश्रिता । कलङ्करेखा = मालिन्यरेखा । इव = यथा । आभाति = आदीप्यते ।

Renu Devi
28/10/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया